आवृता ब्रह्मलोकं या तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता शिवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
आवृता ध्रुवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये शतगुणा ततः ।
आवृता चन्द्रलोकं या तां गङ्गां प्रणमाम्यहम् ॥
षष्टिसहस्रयोजना या दैर्घ्ये दशगुणा ततः ।
आवृता सूर्य्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये च षड्गुणा ततः ।
आवृता सत्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
दशलक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता या तपोलोकं तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये दशगुणा ततः ।
आवृता जनलोकं या तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये सप्तगुणा ततः ।
आवृता या च कैलासं तां गङ्गां प्रणमाम्यहम् ॥
शतयोजनविस्तीर्णा दैर्घ्ये दशगुणा ततः ।
मन्दाकिनी येन्द्रलोके तां गङ्गां प्रणमाम्यहम् ॥
पाताले या भोगवती विस्तीर्णदशयोजना ।
ततो दशगुणा दैर्घ्ये तां गङ्गां प्रणमाम्यहम् ॥
क्रोशैकमात्रविस्तीर्णा ततः क्षीणा च कुत्रचित् ।
क्षितौ चालकनन्दा या तां गङ्गां प्रणमाम्यहम् ॥
सत्ये या क्षीरवर्णा च त्रेतायामिन्दुसन्निभा ।
द्वापरे चन्दनाभा च तां गङ्गां प्रणमाम्यहम् ॥
जलप्रभा कलौ या च नान्यत्र पृथिवीतले ।
स्वर्गे च नित्यं क्षीराभा तां गङ्गां प्रणमाम्यहम् ॥
यस्याः प्रभावमतुलं पुराणे च श्रुतौ श्रुतम् ।
या पुण्यदा पापहर्त्री तां गङ्गां प्रणमाम्यहम् ॥
यत्तोयकणिकास्पर्शः पापिनाञ्च पितामह ! ।
ब्रह्महत्यादिकं पापं कोटिजन्मार्ज्जितं दहेत् ॥
इत्येवं कथितं ब्रह्मन् ! गङ्गापद्यैकविंशतिः ।
स्तोत्ररूपञ्च परमं पापघ्नं पुण्यकारकम् ॥
नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ।
अश्वमेधफलं नित्यं लभते नात्र संशयः ॥
अपुत्त्रो लभते पुत्त्रं भार्य्याहीनो लभेत् प्रियाम् ।
रोगात् प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥
अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पण्डितः ॥
यः पठेत् प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ॥
शुभं भवेत् दुःस्वप्नं गङ्गास्नानफलं लभेत् ॥”
इति गङ्गास्तोत्रम् ॥
नारायण उवाच ।
“भगीरथोऽनेन स्तोत्रेण स्तुत्वा गङ्गाञ्च नारद ! ।
जगाम तां गृहीत्वा च यत्र नष्टाश्च सागराः ।
वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ॥
भगीरथेन सानीता तेन भागीरथी स्मृता ।
इत्येवं कथितं सर्व्वं गङ्गोपाख्यानमुत्तमम् ॥
पुण्यदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्यानेऽन्त्यः ॥

भागुरिः, पुं, स्मृतिव्याकरणादिकर्त्तृमुनिविशेषः । तत्पर्य्यायः । शतसुम्पकः २ । इति जटाधरः ॥ (यथा । “वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।” इति सिद्धान्तकौमुदी ॥)

भाग्यं, क्ली, (भज्यतेऽनेन इति । भज + “ऋहलोर्ण्यत् ।” ३ । १ । १२४ । इति ण्यत् । “चजोः कु घिण्ण्यतोः ।” ७ । ३ । ५२ । इति कुत्वम् ।) प्राक्तनशुभाशुभकर्म्म । तत्पर्य्यायः । दैवम् २ दिष्टम् ३ भागधेयम् ४ नियतिः ५ विधिः ६ । इत्यमरः । १ । ४ । २८ ॥ प्राक्तनकर्म्म ७ भागः ८ भवितव्यता ९ । इति जटाधरः ॥ अदृष्टम् १० । इति शब्दरत्नावली ॥ फलोन्मुखीभूतपूर्व्वदैहिकशुभाशुभं कर्म्म । इति मलमासतत्त्वम् ॥ (यथा,—
“समुद्रमथने लेभे हरिर्लक्ष्मीं हरो विषम् ।
भाग्यं फलति सर्व्वत्र न विद्या न च पौरुषम् ॥”
इति प्राञ्चः ॥
उत्तरफल्गुनीनक्षत्रम् । यथा, बृहत्संहितायाम् । १० । १ ।
“श्रवणानिलहस्तार्द्रा-
भरणीभाग्योपगः सुतोऽर्कस्य ।
प्रचुरसलिलोपगूढ़ां
करोति धात्रीं यदि स्निग्धः ॥”
भागो वृद्ध्यादिरस्मिन् दीयते इति । भाग + “भागाद्यच्च ।” ५ । १ । ४९ । इति यत् ।) भागिके, त्रि । इति सिद्धान्तकौमुदी ॥ (भागमर्हतीति । भाग + “दण्डादिभ्यो यत् ।” ५ । १ । ६६ । इति यत् ।) भागार्हम् । (भज + ण्यत् । भजनीयम् ॥)

भाङ्गीनं, त्रि, (भङ्गाया भवनं क्षेत्रमिति । “विभाषा तिलमाषोमाभङ्गाणुभ्यः ।” ५।२।४ । इति पक्षे खञ् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्ग्यम् २ । इत्यमरहेमचन्द्रौ ॥ (यथा, शब्दरत्नावल्याम् ।
“एवं माष्यन्तु माषीणं कौद्रव्यं कौद्रवीणवत् ।
तथा भाङ्ग्यञ्च भाङ्गीनमुम्यमौमीनमित्यपि ॥”)

भाज, त् क पृथक्कृतौ । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) अबभाजत् धनं भ्रातृवर्गः । इति दुर्गादासः ॥

भाजनं, क्ली, (भाज्यते इति । भाज पृथक्करणे + ल्युट् ।) पात्रम् । इत्यमरः । २ । ९ । ३३ ॥ (यथा, महाभारते । १३ । १११ । १०२ ।
“राजतं भाजनं कृत्वा कपोतः संप्रजायते ॥”)
योग्यम् । इति मेदिनी । ने, १०१ ॥ (यथा, कथासरित्सागरे । ३४ । २०५ ।
“तस्माज्जितात्मा राजा स्याद्युक्तदण्डो विशेषवित् ।
प्रजानुरागादेवं हि स भवेद्भाजनं श्रियः ॥”)
“यः संवादयते नित्यं योऽभिवादांस्तितिक्षति ।
यत्र तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥”
इति मत्स्यपुराणम् ॥
आढ़कपरिमाणम् । इति वैद्यकपरिभाषा ॥

भाजितं, त्रि, (भाज्यते स्मेति । भाज + क्त ।) पृथक्कृतम् । विभक्तम् । इति भाजधातोःकर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (भावे + क्त ।) भागे, क्ली ।

भाजी, स्त्री, (भाज्यते इति । भाज + कर्म्मणि घञ् । भाज + “जानपदकुण्डगोणस्थलभाजनागेति ।” ४ । १ । ४२ । इति ङीष् ।) व्यञ्जनविशेषः । अन्यच्च भाजा । इति स्त्रीप्रत्ययटीकायां दुर्गादासः ॥

भाज्यं, त्रि, भागार्हम् । भाजनीयम् । इति भाजधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥

भाटकः, पुं, क्ली, (भटतीति । भट पोषणे + ण्वुल् ।) व्यवहारार्थं दत्तशकटादिलभ्यधनम् । इति हलायुधः ॥ भाड़ा इति भाषा ॥ अथ गृहादिभाटकम् ।
“परभूमौ गृहं कृत्वा भाटयित्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥
स्तोमं विना वसित्वा तु परभूमावनिच्छतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥”
कात्यायनः ।
“गृहवाप्यापणादीनि गृहीत्वा भाटकेन यः ।
स्वामिने नार्पयेद्यावत्तावद्दाप्यः स भाटकम् ॥”
वापी परकृता प्रतिष्ठितेति विवेचितम् ।
“हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः ।
स्वामिने नार्पयेद्यावत् तावद्दाप्यः स भाटकम् ॥”
बृहन्मनुः ।
“यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति ।
भाटं न दद्याद्दाप्योऽसावनूढ़स्यापि भाटकम् ॥”
शकटं वृषगोकादेरप्युपलक्षणम् । अनूढ़स्यावाहितस्यापि शकटादेः । इति विवादचिन्तामणिः ॥

भाणः, पुं, (भण्यतेऽनेनेति । भण + अधिकरणे घञ् ।) नाटकादिदशरूपकान्तर्गतरूपकविशेषः । इति हेमचन्द्रः । २ । १९८ ॥ तस्य लक्षणादि यथा,—
“भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥
रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितैः ॥
सूचयेद्वीरशृङ्गारौ शौर्य्यसौभाग्यवर्णनैः ।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ॥
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च ।
अत्राकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्य्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णया सूचयेत् । प्रायेणात्र कौशिक्यपि वृत्तिर्भवति । उदाहरणं लीलामधुकरः ।” इति साहित्यदर्पणे ६ परिच्छेदः ॥

भाण्डं, क्ली, (भण्यते भणति वेति । भण शब्दे + “अमन्ताड्डः ।” उणा० १ । ११३ । इति डः । ततः प्रज्ञादित्वादण् ।) पात्रम् । (यथा, महाभारते । १३ । ११ । १०२ ।
“कृत्वा तु काञ्चनं भाण्डं क्रमियोनौ प्रजायते ॥”)
वणिङ्मूलधनम् । भूषा । अश्वभूषा । इति मेदिनी । डे, २१ ॥ (यथा, महाभारते । ७ । २६ । २३ ।